ॐ

# अथ श्री सप्तश्लोकी दुर्गा

शिव उवाच :-

देवि त्वं भक्तसुलभे सर्वकार्यविधायिनी।
कलौ हि कार्यसिद्ध्यर्थमुपायं ब्रूहि यत्नतः।।

देव्युवाच :-

श्रृणु देव प्रवक्ष्यामि कलौ सर्वेष्टसाधनम्।
मया तवैव स्नेहेनाप्यम्बास्तुतिः प्रकाश्यते।।

ॐ अस्य श्रीदुर्गासप्तश्लोकीस्तोत्रमहामन्त्रस्य नारायण ऋषिः, अनुष्टुप्छन्दः, श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः, ऐं बीजं, ह्रीं शक्तिः, क्लीं कीलकं, श्रीदुर्गाप्रीत्यर्थे सप्तश्लोकीदुर्गापाठे विनियोगः।।

अथ ऋष्यादिन्यासः :-

ॐ अस्य श्रीदुर्गासप्तश्लोकीस्तोत्रमहामन्त्रस्य नारायण ऋषये नमः -शिरसि, ॐ श्री अनुष्टुप्छन्दसे नमः - मुखे, ॐ श्रीमहाकालीमहालक्ष्मीमहासरस्वतीदेवताभ्यो नमः- हृदये, ॐ ऐं बीजाय नमः -गुह्ये, ॐ ह्रीं शक्तये नमः -पादयोः, ॐ क्लीं कीलकाय नमः -नाभै, ॐ श्रीदुर्गाप्रीत्यर्थे सप्तश्लोकीदुर्गापाठे विनियोगाय नमः - सर्वांगे।।

| | अथ करन्यासः | अथ अंगन्यासः |
|---|---|---|
| ॐ ऐं नमः | अंगुष्ठाभ्यां नमः | हृदयाय नमः |
| ॐ ह्रीं नमः | तर्जनीभ्यां नमः | शिरसे स्वाहा |
| ॐ क्लीं नमः | मध्यमाभ्यां नमः | शिखायै वषट् |
| ॐ ऐं नमः | अनामिकाभ्यां नमः | कवचाय हुम् |
| ॐ ह्रीं नमः | कनिष्ठिकाभ्यां नमः | नेत्रत्रयाय वौषट् |
| ॐ क्लीं नमः | करतलकरपृष्ठाभ्यां नमः | अस्त्राय फट् |

ॐ भूर्भुवःस्वरोमिति दिग्बन्दः।

ॐ ज्ञानिनामपि चेतांसि देवी भगवती हि सा।
बलादाकृष्य मोहाय महामाय प्रयच्छति।।१।।

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः,
स्वस्थैः स्मृता मतिमतीव शुभां ददासि।
दारिद्र्यदुःखभयहारिणि का त्वदन्या,
सर्वोपकारकरणाय सदार्द्रचित्ता ।।२।।

सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते।।३।।

शरणागतदीनार्तपरित्राणपरायणे।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते।।४।।

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते।।५।।

रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान् सकलानरिष्टान्।
त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति।।६।।

सर्वाबाधाप्रश्समनं त्रैलोक्याखिलेश्वरि।
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम्।।७।।

।। ॐ श्री दुर्गार्पणमस्तु।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM